# मनोगतम् [०२.२०] 'मनकीबात', प्रसारण-तिथि:- ३१-जान्युआरी,२०२१

[भाषान्तरं-डॉ.श्रुतिकान्तपाण्डेय-पुरुषोत्तमशर्म-गवीशद्विवेदिभिः सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः | यदाहं 'मनकीबात' - इति प्रसारयामि, तदा एवं प्रतीयते, यथा भवतां मध्ये, भवतां कुटुम्ब-सदस्यरूपेण उपस्थितोऽस्मि | अस्मदीयानि लघु-लघूनि वृत्तानि, यानि अन्योन्यं किञ्चित् शिक्षेरन्, जीवनस्य च कटु-मधुरानुभवाः, ये हि आकण्ठं जीवितुं प्रेरणारूपाः भवेयुः | अस्तु, इदमेवास्ति 'मन की बात' | अद्य, ऐषमः जान्युआरी-मासस्य अन्तिमः दिवसः | किं भवन्तः अपि मामिव इदं विचारयन्ति यत् सद्यः कतिपयेभ्यः एव दिनेभ्यः प्राक्तु एकविंशोत्तर-द्विसहस्रतममिदं वर्षम् आरभत? नैवं प्रतीयते यत् पूर्णः जान्युआरी-मासः व्यतीतः | एषा एव कालगतिः इत्युच्यते | कतिपय-दिन-पूर्वीयम् एवेदं वृत्तम् इति प्रतीयते यदा वयं परस्परं शुभकामनाः प्रकटयन्तः आस्म| ततः परं वयं लोहड़ी-मकर-संक्रान्ति-पोंगल-बिहु-इत्युत्सवान् आमानितवन्तः | देशस्य पृथक्-पृथक्-अंशेषु इमे उत्सवाः सोत्साहम् आमानिताः | जान्युआरी-मासे त्रयोविंशे दिने वयं नेतुः सुभाषचंद्रबोस-वर्यस्य जन्मदिनं 'पराक्रम-दिवसत्वेन' आयोजितवन्तः, तथा च एतन्मासीये षड्विंशे दिने 'गणतन्त्र-दिवसस्य' भव्यं सामूहिकं प्रयाणमपि अवलोकितवन्तः | संसदः संयुक्तसत्रस्य राष्ट्रपति-महोदयद्वारा विहित-सम्बोधनानन्तरम् आयव्यय-पत्रकसत्रमपि आरभत | एतेषु सर्वेषु सत्सु अन्यतमं कार्यमेकं सम्पन्नम्, यस्य प्रतीक्षां वयम् आतुरतया कुर्मः | एतदस्ति - पद्मपुरस्काराणाम् उद्घोषणम् | राष्ट्रेण 'असाधारण-कार्यं कुर्वाणाः जनाः', तेषाम् उपलब्धीनां, मानवतां प्रति तेषाञ्च योगदानस्य कृते सम्मानिताः | वर्षेऽस्मिन्, पुरस्कार-प्रापकेषु अपि, ते जनाः समावेशिताः सन्ति, ये हि विभिन्नेषु क्षेत्रेषु प्रशस्ततरं कार्यं कृतवन्तः, स्वीय-कार्यैः कस्यचित् जीवनं परिवर्तितवन्तः, देशञ्च अग्रे नीतवन्तः | अर्थात्, भूतलीय-स्तरेण कार्यं कुर्वतां Unsung Heroes-इति अनभिज्ञातानां नायकानां कृते पद्मसम्मान-प्रदानस्य या परम्परा देशेन

कतिपय-वर्षेभ्यः प्राक् आरब्धा, सा ऐषमः क्रमेऽपि सन्धारितास्ति । साग्रहं भवतः सर्वान् निवेदयामि यत्, एतेषां जनानां विषये, तेषाञ्च योगदानविषये, अवश्यम् अवगच्छन्तु, कुटुम्बे च तेषां विषये, चर्चां कुर्वन्तु । अवलोकयन्तु, सर्वेऽपि एवंविधिना कियतीं प्रेरणाम् अवाप्स्यन्ति ।

अस्मिन् मासे क्रिकेट्-क्रीडाङ्गणात् शुभा वार्ता अधिगता। अस्माकं क्रिकेट्-दलेन प्रारम्भिक-काठिन्यानन्तरं भद्रप्रदर्शनं विधाय ऑस्ट्रेलियादेशे शृङ्खला विजिता। अस्माकं क्रीडकाणां कठिनः श्रमः, अथ च समेकितप्रयासः प्रेरणास्पदं विद्येते। अत्रान्तरे देहल्यां मासेऽस्मिन् षड्विंशे दिने त्रिवर्णध्वजस्य अपमानेन राष्ट्रं दुःखितमपि सञ्जातम्। अस्माभिः भाविकालः नवीनाशया नवीनतया च युक्तः विधातव्यः। अस्माभिः गतवर्षे असाधारण-संयमस्य साहसस्य च परिचयो दत्तः। अस्मिन् वर्षेऽपि कठोरपरिश्रमं विधाय निजसङ्कल्पस्य सिद्धिः करणीया। अस्माकं राष्ट्रम् इतोऽपि जवीयस्या गत्या अग्रे नेतव्यम्।

मम प्रियाः देशवासिनः! अस्य वर्षस्य आदौ एव कोविड्-सङ्क्रमणं विरुध्य सङ्घर्षः प्रायेण एकवर्षात्मकः सञ्जातः। यथा कोरोना-संक्रमणं विरुध्य भारतस्य सङ्घर्षोदाहरणं अविद्यत, तथैव अस्माकं Vaccination programme इति सूच्यौषध-कार्यक्रमः जगति विशेषत्वं सन्धत्ते। अद्य भारतं जगतः बृहत्तमं कोविड्-सूच्यौषधा-भियानं सञ्चालयति । भवन्तो जानन्ति यत् इतोऽपि गौरवपूर्णम् किमस्ति? यत् वयं बृहत्तम-सूच्यौषधाभियानेन सहैव जगति द्रुतगत्या नागरिकेभ्यः सूच्यौषधमपि यच्छामः। केवलं पञ्चदश-दिवसेषु भारतेन त्रिंशल्लक्षाधिकेभ्यः कोरोनायोद्धृभ्यः स्वास्थ्य-कर्मिभ्यः च सूच्यौषधं सुलभायितम्, अपरत्र अमेरिकासदृशेन समृद्धदेशेन अष्टादशदिनेषु, अथ च ब्रिटेनदेशेन षड्त्रिंशत्-दिनेषु इदं कार्यं विहितम्।

सखायः! भारते निर्मितं सूच्यौषधं भारतस्य आत्मनिर्भरतायाः प्रतीकं तु अस्त्येव, भारतस्य आत्मगौरवस्य अपि प्रतीकमस्ति। NaMoApp इत्यस्मिन् चरिष्णुतन्त्रे उत्तर-प्रदेशस्य भ्राता हिमांशुयादवः अलिखत् यत् 'Made-in-India Vaccine' इति भारतनिर्मित-सूच्यौषधेन मनसि नूतनः आत्मविश्वासः आगतः। मदुरैतः कीर्तिमहोदया लिखति यत् तस्याः अनेकानि वैदेशिकमित्राणि तस्यै सन्देशं विलिख्य भारताय धन्यवादं यच्छन्ति । कीर्तिवर्यायाः मित्रैः तस्यै लिखितं यत् भारतेन यथा

कोरोनां विरुध्य संजायमाने सङ्घर्षे जगतः साहाय्यं कृतं तेन तेषां मनस्सु भारतं प्रति सम्मानः समेधितः। कीर्तिमहोदये! देशस्य गौरवगानमिदं श्रुत्वा 'मनकीबात'-कार्यक्रमस्य श्रोतारश्चापि गौरवमनुभवन्ति। सम्प्रति मयापि पृथक्-पृथक्-देशानां राष्ट्रपतिभ्यः प्रधानमंत्रिभ्यश्च भारताय एतादृशाः सन्देशाः प्राप्यन्ते। भवद्भिरपि दृष्टं स्यात् यत् ब्राज़ीलस्य राष्ट्रपतिना ट्वीट-सन्देशस्य माध्यमेन यथा भारतस्य धन्यवादो विहितः, तद्दृष्ट्वा प्रत्येकं भारतवासी कियत् सुखम् अनुभूतवान्। नैक-सहस्र-किलोमीटर-दूरात् जगतः दूर-सुदूरकोणेभ्यः तत्तत्-राष्ट्राणां निवासिनः रामायणस्य तत्-प्रसंगं गूढतया जानन्ति, तेषां मनस्सु विपुलप्रभावो विद्यते। इयमस्ति अस्माकं संस्कृतेः विशेषता।

सखायः! अस्मिन् सूच्यौषध-कार्यक्रमे भवद्भिः अपरमेकं वृत्तं नूनं ध्यातं स्यात् यत् सङ्कट-काले भारतं जगतः सेवां कर्तुं प्रभवति यतोहि भारतमद्य औषधिनिर्माणे सूच्यौषधनिर्माणे च सक्षमम् आत्मनिर्भरं च वर्तते। इदमेव विचारजातं आत्मनिर्भर-भारताभियानस्य अप्यस्ति। भारतं यावत् सक्षमं भविष्यति, तावतीमेव मानवतायाः सेवां करिष्यति, तावान्नेव अधिको जगतो लाभो भविता ।

मम प्रियाः देशवासिनः, सर्वदैव भवतां बहूनि पत्राणि प्राप्यन्ते। NaMoApp, अथ च Mygov-इत्यत्र भवतां सन्देश-दूरभाष-माध्यमेन वृत्तानि अवगन्तुम् अवसरं प्राप्नोमि | एतेषु एव संदेशेषु अन्यतमः एतादृशः अपि संदेशः अस्ति, तेन मम ध्यानम् आकृष्टं - अयं संदेशः, भगिन्याः प्रियंकापांडेय-महाभागायाः अस्ति | त्रयोविंश-वर्षीया पुत्री प्रियंका, हिन्दीसाहित्यस्य छात्रा अस्ति, अथ च, बिहारे सीवान-नगरे निवसति | प्रियंका-महोदयया NaMo App-इत्यत्र लिखितं यत् सा, देशस्य पञ्चदशानां देशाभ्यन्तरीण-पर्यटनस्थलानां यात्राविषयकेण मदीय-प्रस्तावेन अतितरां प्रेरिता अभवत्, अतः एतन्मासे एकदिनाङ्के सा अन्यतम-स्थानार्थं प्रस्थिता, तत्-स्थानम् अतितरां विशिष्टमासीत् | तत्-स्थानमासीत् - तस्याः गृहात् पञ्चदश-किलोमीटरदूरम्, देशस्य प्रथमराष्ट्रपतेः डॉक्टरराजेंद्रप्रसाद-महोदयस्य पैतृकनिवासः | प्रियंका-महोदया रोचकं वृत्तम् अलिखत् यत् निजदेशस्य महतीनां विभूतीनाम् अभिज्ञान-दिशायां तस्याः अयं प्रथमः पदक्षेपः आसीत् | प्रियंका-महोदया तत्र डॉक्टरराजेंद्रप्रसाद-वर्येण लिखितानि पुस्तकानि अलभत, अनेकानि ऐतिहासिकानि चित्राणि अवाप्नोत् | वस्तुतस्तु, प्रियंकामहोदये! भवत्याः अयम् अनुभवः अन्यान् अपि प्रेरयिष्यति |

सखायः, एतद्-वर्षतः भारतं स्वीय-स्वाधीनतायाः पञ्च-सप्ततिवर्षात्मकं समारोहम् – अमृतमहोत्सवम् आरप्स्यते | एवं सति, अयं हि अस्माकं तैः महानायकैः सम्बद्धानि स्थानीय-स्थलानि अवगन्तुं भद्रतरः कालः अस्ति, येषां कारणात् वयं स्वातन्त्र्यम् अवाप्तवन्तः |

सखायः! वयं स्वतन्त्रतान्दोलनस्य बिहारस्य च चर्चां कुर्मः, तर्हि अहं NaMo App इत्यत्र विहिताम् एकाम् अन्यां टिप्पण्णीमपि चर्चितुमिच्छामि। मुंगेरस्य निवासी जयराम-विप्लवः तारापुर-हुतात्मदिवसविषये अलिखत्। गतशताब्दस्य द्वात्रिंशत्तमे वर्षे फेब्रुआरीमासस्य पंचदशे दिने देशभक्तानां वृन्दस्य अनेकेषां वीराणाम् निर्ममतया हत्या आंग्लैः कृता । तेषामेकमात्रापराधः आसीत् यत् तैः 'वंदे मातरम्' 'भारतमातुः जयघोषः' च कृतः। अहं तेभ्यः हुतात्मवीरेभ्यः नमामि। तेषां शौर्यं च श्रद्धापूर्वकं स्मरामि। अहं जयराम-विप्लववर्याय धन्यवादं समर्पयामि । सः राष्ट्रस्य समक्षं तादृशीमेकां घटनां समानीतवान्, यस्याः चर्चा प्रभावपूर्णरीत्या नैवाभवत्।

मम प्रियाः देशवासिनः! भारतस्य प्रेत्यकं क्षेत्रे नगरे ग्रामे च स्वतन्त्रतायै सङ्घर्षः पूर्णमनोयोगेन प्रवर्तितः। भारतभूमौ प्रत्येकं कोणे एतादृशैः महद्-योद्धृभिः वीरांगनाभिः च जन्म प्राप्तम् । तैः राष्ट्राय आत्मनो जीवनं समर्पितम् । अतः इदम् अत्यन्तं महत्त्वपूर्णमस्ति यदस्मभ्यं विहितान् तेषां संघर्षान्, तत्-सम्बद्ध-स्मृतीः च वयं संरक्षेम। एतदर्थं तेषां विषये लिखित्वा वयम् अस्माकं भाविसन्ततिभ्यः हुतात्मनां स्मृतीः संरक्षेम। अहं सर्वेषां देशवासिनां, विशेषतया च यूनाम् आह्वानं करोमि यत् देशस्य स्वतंत्रता-सैनिकानां विषये, स्वतन्त्रतया सम्बद्ध-घटनानां च विषये ते नूनं लिखन्तु। निजक्षेत्रे स्वतंत्रता-संग्रामस्य कालेन सम्बद्धानां वीर-गाथानां च विषये पुस्तकानि लिखन्तु । सम्प्रति यदा भारतं निज-स्वतन्त्रतायाः पंचसप्ततितमं वर्षम् आमानयिष्यति, तदा भवतां लेखनमिदं स्वतन्त्रतायाः नायकान् प्रति उत्तम-श्रद्धाञ्जलित्वेन भविता । युवलेखकेभ्यः 'भारतं पंचसप्ततिवर्षाणि'-इत्यस्य कृते एका प्राथमिक-प्रयासरूपा योजना प्रारभ्यते। अनया समेषां राज्यानां भाषाणां च युवलेखकाः प्रोत्साहनं प्राप्स्यन्ति । देशे बृहत्सङ्ख्यायाम् एतादृश-विषयेषु लेखितुकामाः लेखकाः निर्मास्यन्ते, येषां भारतीय-रिक्थविषये संस्कृतौ च गहनाध्ययनं भविष्यति। अस्माभिः एतादृश-नवोन्मेषशालि-प्रतिभानां पूर्णसाहाय्यं कर्तव्यम्।अनेन भावि-दिशानिर्धारकाणां विचारकाणां नीतिनिर्मातॄणां च वर्गोऽपि निर्मास्यते। अहं निजयुव-सहयोगिनः, अस्मिन्

पदक्षेपे आत्मानं संयोजयितुं, स्वीय-साहित्यिक-कौशलञ्च अधिकाधिकम् उपयोक्तुम् आमन्त्रयामि । अनेन सम्बद्धं विवरणं शिक्षामन्त्रालयस्य अन्तर्जालीय-वाहिनीफलकात् प्राप्तुं शक्यते।

मम प्रियाः देशवासिनः! 'मन की बात'- कार्यक्रमे श्रोतृभ्यः किं रोचते इति तु भवन्तः एव भद्रतरं जानन्ति। परं मह्यं 'मन की बात'- कार्यक्रमे सर्वाधिकं यत् रोचते तदस्ति - अहं सुबहु ज्ञातुं शिक्षितुं च अवसरं प्राप्नोमि । एकप्रकारेण परोक्षरूपेण च भवद्भिः सर्वैः सह संवादावसरो लभ्यते। केषाञ्चित् प्रयासः, कस्यचित् विश्वासः, कस्यचित् च देशाय समर्पणभावः – सर्वमेतत् मह्यं प्रेरयति, मयि ऊर्जां च संचारयति।

हैदराबादस्य बोयिनपल्लीक्षेत्रे, एका स्थानीया शाकान्न-विपणी कथं नैजं दायित्वं निर्वहति - इदं पठित्वा मया आनन्दसन्दोहः अनुभूतः। अस्माभिः दृष्टं यत् शाकान्न-विपणीषु बहुविधैः कारणैः शाकान्नं दूषितं भवति। इदं शाकान्नं च इतस्ततः प्रसृतं भवति, अवकरं च प्रसारयति परं बोयनपल्लीक्षेत्रस्य शाकान्न-विपण्या निश्चितं यत् प्रतिदिनम् अवशिष्टं शाकान्नम् एवमेव इतस्ततः न प्रक्षेपणीयम्। शाकान्न-विपणी-सम्बद्धजनैः निर्धारितं यदनेन अवशिष्टेन शाकान्नेन विद्युन्निर्माणं कर्तव्यम्। अवशिष्ट-शाकेभ्यः विद्युन्निर्माणविषये कदाचिदेव भवता श्रुतं स्यात् - इयमेवास्ति नवाचारस्य शक्तिः। अद्य बोयिनपल्लीक्षेत्रस्य शाकान्न-विपण्यां पूर्वं यदवशिष्टमासीत् तेन सम्पत्-रक्षणं विधीयते। इयमेवास्ति अवकरात् कञ्चननिर्माणस्य यात्रा। तत्र प्रतिदिनं दशटनपरिमितः अवकरः जायते, सः अवकरः एकस्मिन् संयन्त्रे संस्थाप्यते, ततः अवकरात् प्रतिदिनं ५००-यूनिट-मितं विद्युन्निर्माणं भवति। अथ च, आहत्य ३०-किलोपरिमितं जैवेन्धनमपि निर्मीयते |अनया विद्युदा एव शाकान्न-विपण्यां प्रकाशो भवति, तथा च जैवेन्धनं भवति, तेन च शाकान्न-विपण्याः आहारनिलये भोजनं निर्मीयते - अप्यस्ति प्रशस्यः प्रयासोऽयं ननु? एवमेव प्रसङ्गः, हरियाणाराज्यस्य पंचकुलाजनपदस्य बड़ौत-ग्राम-पंचायतेनापि कृतः। अस्मिन् पंचायतक्षेत्रे जलनिकास-समस्या आसीत्, एतस्मात् कारणात् दूषितं जलम् इतस्ततः प्रसरति स्म, रोगान् च जनयति स्म, परं च बड़ौत-वासिभिः निश्चितं यत् दूषितजलादपि सम्पत्-रक्षण-प्रयोगं करिष्यामः इति । ग्रामपंचायतेन सम्पूर्णग्रामस्य जलम् एकत्रितं कृत्वा निर्मलीकरणं प्रारब्धम्। इदानीं निर्मलं जलं कृषकैः सेचनकार्येषु उपयुज्यते। अर्थात् प्रदूषणात् अस्वच्छतायाः रोगेभ्यश्च मुक्तिः अपि, युगपद् एव कृषिसेचनमपि ।

सखायः, पर्यावरणसंरक्षणेन कथं आयस्रोतांस्यपि उद्घाटितानि भवन्ति, एतस्य एकम् उदाहरणं अरुणाचलस्य तवांगक्षेत्रे अपि दृश्यते। अरुणाचलस्यास्मिन् पार्वत्यक्षेत्रे शीततौ 'मोन-शुगु' नामकः कर्गदः उत्पाद्यते। कर्गदमेनम् अत्रत्याः स्थानीयाः 'शुगु-शेंग' इतिनामकेन पादपवल्कलेन कल्पयन्ति। एतत्कृते वृक्षच्छेदनस्यावश्यकता न भवति। अस्य निर्माणे च कस्यचिद्रसायनस्य प्रयोगोऽपि नैव विधीयते। एवमयं कर्गदः पर्यावरणेन साकं स्वास्थ्यस्यापि कृते सुरक्षितो भवति। कस्मिंश्चित्समये अस्य कर्गदस्य निर्यातः भवति स्म, परमधुना कर्गदानां प्रभूतोत्पादन-कारणेनैषा स्थानीयकला विलुप्तप्राया संजाता। साम्प्रतमेकेन स्थानीयसामाजिक-कार्यकर्त्रा गोम्बु-इत्यनेन अस्याः कलायाः पुनरुज्जीवनाय प्रयासः आरब्धः। अनेन अत्रत्येभ्यः आदिवासिजनेभ्यः जीविकापि लभ्यते। अन्यमेकं वृत्तं मया केरलविषयेऽपि श्रुतं यद्धि अस्मास्वपि दायित्यभावं जनयति। केरलस्य कोट्टायमक्षेत्रे दिव्यांगवृद्धः एन्.एस्.राजप्पनवर्यः वसति। वरीयः राजप्पनः पक्षाघातकारणेन चलने असमर्थः। परमेतेन स्वच्छतां प्रति समर्पणे तस्य काचिदपि शिथिलता न दृश्यते। असौ विगतानेकवर्षेभ्यः समीपवर्तिनं वेम्बनाड-जलाशयं गच्छति, तस्मिन् क्षिप्ताश्च कृतककूपीः बहिरानयति। क्षणं चिन्तयन्तु, राजप्पन्-महोदयस्य विचाराः कियदुन्नताः सन्ति? अस्माभिरपि राजप्पन्-महोदयस्य उत्प्रेरणेन स्वच्छतायाः कृते स्वीयं यावत्संभवं योगदानं नूनं कर्तव्यम्।

प्रियाः देशवासिनः, कतिपयेभ्यः दिनेभ्यः पूर्वं, भवद्भिः दृष्टं स्याद्यत् अमेरिकादेशस्य सैन्-फ्रांसिस्कोतः बैङ्गलुरुं यावदेकस्याः अजस्रवायुसेवायाः संचालनं भारतस्य चतसृभिः महिला-विमानचालिकाभिः सम्पादितम् । दशसहस्रतोऽप्यधिक-किलोमीटरमितां यात्रां विधाय विमानसेवैषा द्विशताधिक-यात्रिभिः साकं भारतमागता। भवद्भिः अस्मिन्वर्षे गणतन्त्रदिवसीय-सामूहिक-प्रयाणेऽपि दृष्टं स्याद्यत् वायुसेनानां महिला-विमानचालिकाभ्यां इतिहासो विरचितः। क्षेत्रन्तु किञ्चिदपि भवेत्, देशस्य महिलानां सहभागः सर्वत्रैवाभिवर्धते। परं वयमनुभवामः यद्देशस्य ग्रामीणक्षेत्रेषु भूयमानानां एतादृक्-परिवर्तनानां चर्चा अल्पतरा जायते- एतत्कृत्वा यदाऽहं मध्यप्रदेशस्य जबलपुरस्यैकं वृत्तमपश्यं तावन्मया चिन्तितं यदस्य चर्चा तु मया 'मनकीबात'-प्रसारणे अवश्यमेव कर्तव्या। एषा हि अतीव प्रेरणास्पदं वृत्तमस्ति। जबलपुरस्य चिचगांव-क्षेत्रे कतिपयमहिलाः तण्डुलयन्त्रालये दैनिकाधारेण वृतिमर्जयन्ति

स्म। कोरोना-महारोगेण यथा विश्वस्य प्रत्येकं जनः दुष्प्रभावितः, तथैवेताः अपि जाताः। यन्त्रालये कार्यं निरुद्धं येन तासामायः पिनद्धः। परमेताः निराशास्तु नैव जाताः अपितु स्वकीयमेकं तण्डुलयन्त्रालयं स्थापयितुं ताभिः संकल्पितम् । तासां यन्त्रालयः चापि स्वीयोपकरणानि विक्रेतुमिच्छुकः आसीत्। महिलासु मीना-राहंगडाले- इत्यनया सर्वाभिः महिलाभिः सम्भूय 'स्वयंसहायता- समूहः' संघटितः, स्वीयसंरक्षितधनेन च पुञ्जिनियोजनं सम्पादितम्। वांछित-धनस्य कृते 'आजीविका'-कार्यक्रमान्तर्गतं धनागारात् ऋणमादाय आत्मनः यन्त्रालयः स्थापितः । एताः महिलाः साम्प्रतं स्वकीये तण्डुलयन्त्रालये कार्यं कुर्वन्ति। एतेषु दिनेषु यन्त्रालयेन प्रायेण त्रिलक्षरूप्यकाणां लाभः अर्जितः। एतल्लाभेन मीनामहोदया प्रथमं धनागारस्य ऋणशोधने, अनन्तरञ्च व्यापारसंवर्धनाय सन्नद्धा वर्तते । कोरोनारोगेणोत्पादितासु विकटपरिस्थितिषु देशस्य प्रत्येकमपि भागे एतादृशाः अद्भुतप्रयासाः सम्पादिताः।

मम प्रियाः देशवासिनः, यद्यहं बुन्देलखण्डविषये चर्चां करोमि, तर्हि कीदृग्विधाः विषयाः मनसि समुद्भवन्ति? इतिहासोत्कण्ठिताः जनाः एतत्क्षेत्रं झांसीराज्ञ्या लक्ष्मीबाई-इत्यनया संयोजयिष्यन्ति। तत्रैव केचन जनाः सुन्दरं शान्तं च ओरछाविषयं चिन्तयिष्य- न्ति। अन्ये चैतत्क्षेत्रस्य भीषणनिदाघमपि स्मर्तुमर्हन्ति। परं विगतदिनेषु अत्र किंचिद्वि- लक्षणं उत्साहवर्धकं च सम्पाद्यते, यस्य विषये अस्माभिः अवश्यमेव ज्ञातव्यम् । गतदिवसेषु झांसीक्षेत्रे एकमासात्मकं 'स्ट्राबेरी-फेस्टिवल' इति मेलकमारब्धम्। एतच्छ्रुत्वा प्रत्येकमपि "बुन्देलखण्डे स्ट्राबेरी!!" इति चिन्तयत् नूनमाश्चर्यमनुभविष्यति। परमिदमेव साम्प्रतं सत्यमस्ति। बुन्देलखण्डे अधुना स्ट्राबेरीफलानां उत्पादनाकर्षणं वर्धमानमस्ति। अस्मिन्परिवर्तने झांसीपुत्र्या गुरलीनचावला-इत्यनया महती भूमिका निर्व्यूढास्ति। विधिछात्रया गुरलीनेन प्रथमं स्वीयगृहे, तदनु च क्षेत्रेषु स्ट्राबेरी-उत्पादनस्य सफलप्रयोगेन विश्वासः उत्पादितः यदस्मिन्क्षेत्रेऽप्येतत् सम्भवमस्ति इति । झांस्याः 'स्ट्राबेरी फेस्टिवल' - इति मेलकं 'स्टे एट होम' इति सन्दर्भे आधारितमस्ति। एतन्माध्यमेन कृषकाः युव- जनाश्च स्वीयगृहपृष्ठेसु छदिषु गृहोपरि-उद्यानेषु च स्ट्राबेरी-उत्पादनाय प्रोत्साहिताः जायन्ते। नूतन-प्रविधीनां साहाय्येन देशस्य अन्यभागेष्वपि एतादृग्प्रयासाः सम्पाद्यमानाः सन्ति, येन स्ट्राबेरीफलं यद्धि पार्वत्यक्षेत्राणामभिज्ञानमवर्तत; साम्प्रतं कच्छक्षेत्रस्य सिकतास्वपि उत्पाद्यते, कृषकेभ्यः चार्थलाभं अभिवर्धयन्ति।

सखायः! ‘स्ट्राबेरी फेस्टिवल’-सदृशाः प्रयोगाः नवाचारभावं तु प्रदर्शयन्ति, युगपदेव प्रदर्शयन्ति यदस्माकं देशे कृषिक्षेत्रमपि केन प्रकारेण नूतनं प्रविधिं स्वीकरोति। सखायः, कृषिक्षेत्रम् आधुनिकं कर्तुं सर्वकारः प्रतिबद्धः, एतस्य च कृते अनेके निर्णयाः समाचरिताः। सर्वकारस्य एतादक्प्रयासाः अनागतेऽपि सम्प्रवर्तिताः भविष्यन्ति।

मम प्रियाः देशवासिनः, कतिपय-दिनपूर्वं मया एकं चलदृश्यांकनं वीक्षितम् । चलच्चित्रमिदं पश्चिमबंगालस्य पश्चिमीय-मिदनापुरस्थितस्य नया-पिंगलाग्रामस्य चित्रकारस्य सरमुद्दीनस्य आसीत्। असौ प्रसन्नतां प्रकटयति स्म यत् रामायणाधृतं तस्य चित्रं द्विलक्षरूप्यक-मूल्येन विक्रीतम् । एतेन तस्य ग्रामजनाः अपि अतिप्रसन्नाः अभवन्। चलच्चित्रदर्शनानन्तरमहं तस्मिन्विषये अधिकतरं ज्ञातुं उत्सुकः अभवम्। अस्मिन्क्रमे मया पश्चिमबंगालसम्बद्धा प्रशंसार्हा एका परम्पराऽभिज्ञाता या भवद्भिः साकमत्र संविभाज्यते। पर्यटनमन्त्रालयस्य स्थानीय-कार्यालयेन मासारम्भे एव बंगालस्य ग्रामेषु ‘इन्क्रेडिबल-इण्डिया-वीकेण्ड-गेटवे’ इत्यस्य आयोजनं विहितम् । अस्यान्तर्गतं पश्चिम-मिदनापुर- बांकुरा-बीरभूम-पुरुलिया-पूर्ववर्धमानेति क्षेत्राणां हस्तशिल्पकारैः प्रेक्षकाणां कृते हस्तशिल्पकार्यशालाः आयोजिताः । अहं सूचितोस्मि यत् अस्मिन्नायोजने हस्तकलोत्पादानां विक्रयेण या राशिः अर्जिता सा हि शिल्पकारेभ्यः उत्साहप्रदास्ति। अखिलेऽपि देशे अन्येऽपि जनाः अस्माकं कलासम्पदां लोकप्रियां कर्तुं यतन्ते । एतेषु ओडिशाराज्यस्य राउरकेला-निवासिनी भाग्यश्री-साहूः अप्यस्ति। अपरतस्तु एषा आभियान्त्रिक-छात्रास्ति, परं विगतेषु मासेष्वनया पट्टचित्रकलायाः अभ्यासः आरब्धः, नैपुण्यं चाधिगतम् । एतत्कलायाः प्रयोगः तया ‘सॉफ्टस्टोन’ इत्येतेषु कृतः । स्वीयमहा- विद्यालयस्य गमनागमनप्रसंगेषु तया प्रस्तराः संगृहीताः, स्वच्छीकृत्य चैतेषु पट्टचित्रकलायाः अभ्यासः आरब्धः। असौ चित्रित-प्रस्तरान् स्वीयमित्रेभ्यः उपहाररूपेण ददाति स्म। संचाररोधकाले सा कूपीष्वपि चित्रांकनम् आरभत। साम्प्रतं त्वसौ एतत्कलाविषये कार्यशालानामायोजनं करोति। कतिपयदिनपूर्वं सुभाषमहाभागस्य जयन्त्यवसरे तया पाषाणचित्राणां माध्यमेनैव अद्भुत-श्रद्धांजलयः समर्पिताः। अहं तस्यैः अनागत-प्रयासानां कृते शुभकामनाः व्याहरामि। चित्राणां वर्णानां च माध्यमेन नवाचाराणां अपरिमित-सम्भावनाः वर्तन्ते। झारखण्डस्य दुमकाक्षेत्रे विधीयमानस्य एतादृक्प्रयासस्य विषयेऽहं सूचितोऽस्मि। अत्र माध्यमिकविद्यालयस्य

प्रधानाचार्येण बालानां पठनाधिगमनाय च ग्रामस्य भित्तिष्वेव आंग्ल-हिन्दी-भाषयोः अक्षराणि चित्रितानि। एतेन ग्रामीणबालाः अतिशयं लाभमधिगच्छन्ति। अहमेतेषां सर्वेषामपि महानुभावानाम् अभिनन्दनं करोमि, ये एतादक्प्रयासेषु संवलिताः सन्ति।

मम प्रियाः देशवासिनः, भारतात् सहस्राधिक- किलोमीटरदूरं महासागराणां महाद्वीपानां च पारमेकं 'चिली'-नामकः देशः अस्ति। भारतात् चिलीगमनाय बहुकालः अपेक्षते परं भारतीयसंस्कृत्याः गन्धः तत्र पूर्वमेव प्रसरितोऽस्ति। एतत्कारणेनात्र योगविद्या अतीव लोकप्रिया वर्तते। भवन्तः एतज्ज्ञात्वा प्रसन्नाः भविष्यन्ति यच्चिली-देशस्य राजधान्यां सैन्टियागो-नगरे त्रिंशदधिकाः योगविद्यालयाः प्रचलन्ति। चिलीदेशे आन्ताराष्ट्रिक-योगदिवसः अतीवोत्साहेन मान्यते। अत्रत्ये 'हाउस-ऑफ़-डेप्यूटीज्'-सदने योगदिवसमालक्ष्य उल्लासपूर्णः परिवेशः जायते। कोरोनाकाले रोगप्रतिरोध-क्षमतायाः महत्त्वं तस्य च कृते योगस्य क्षमतामालक्ष्य चिलीवासिनः एतद्विज्ञानं अधिकतरं आमनन्ति । तत्रत्य-कान्ग्रेसिति संसदा एकः प्रस्तावः अधिगतः। सर्वकारेण नवम्बर-मासस्य चतुर्थः दिनांकः राष्ट्रिययोगदिवसत्वेन अंगीकृतः। भवन्तः चिन्तयिष्यन्ति यत् कथं नवम्बरस्य चतुर्थः दिवसः? वस्तुतः एकोनविंशति-शतोत्तर-द्विषष्टितमे वर्षे एतस्मिन्नेव दिवसे 'होजे-राफ़ाल-एस्ट्राडा'-महाभागेन चिली-देशे प्रथमं योगसंस्थानं स्थापितमासीत्। अत्रैव चतुर्नवम्बरे योगदिवसस्य घोषणया एस्ट्राडा-महोदयाय श्रद्धांजलिः अर्पितः अस्ति। चिली-संसदा सम्पादितैषा घोषणा प्रत्येकं भारतीयं गर्वेणापूरयति। चिली- संसत्संबद्धम् अन्यमेकं वृत्तं भवद्भ्यः सकौतुकं भविष्यति। अत्रत्यस्य उपराष्ट्रपतेर्नाम रबीन्द्रनाथ-क्विन्टेरॉस् अस्ति। तस्य नाम विश्वगुरुणा टैगोरमहाभागेन प्रेरितं सत् निर्धारितम्।

मम प्रिया: देशवासिनः! MyGovइत्यस्मिन् पटले महाराष्ट्रे जाल्ना-जनपदस्य डॉ.स्वप्निलमन्त्री, अथ च केरले पलक्कड्-जनपदस्य प्रह्लाद-राजगोपालन् च आग्रहं कृतवन्तौ यदहं 'मनकीबात'- इत्यत्र मार्गसुरक्षाविषये वदेयम्। अस्य मासस्य अर्थात् जनवरी-मासस्य अष्टादशदिनाङ्कतः फेब्रुअरी-मासस्य सप्तदशदिनाङ्कं यावत् अस्माकं देशः मार्गसुरक्षामासं अर्थात् Road Safety Month इत्यपि आचरन् अस्ति। मार्गदुर्घटनाः सम्प्रति न केवलम् अस्माकं देशे अपितु समग्रे विश्वे चिन्ताविषय: अस्ति। अद्य भारते मार्गसुरक्षायै प्रशासनेन सह व्यक्तिगतसामूहिकस्तरेषु

विभिन्नप्रकारका: प्रयासा: क्रियन्ते। जीवनरक्षायै एते प्रयासा: अस्माभि: सर्वै: सक्रियै: अनुपालनीया:।

सखायः! भवद्भिः अवधानं कृतं स्यात्, Boarder Road Organization इति सीममार्गसङ्घटनं यान् मार्गान् निर्माति, तत: गमनसमये innovative slogans इति अभिनव- घोषवाक्यानि दृष्टिपथि आयान्ति । This is Highway not Runway, वा Be Mr. Late than Late Mr. - एतानि घोषवाक्यानि मार्गे जनान् सावधानान् कर्तुं प्रभावं जनयन्ति। इदानीं भवन्त: अपि एतादृशानि अभिनव- घोषवाक्यानि ग्राहक- सूक्तीः वा MyGov इत्यत्र प्रेषयितुं शक्नुवन्ति। भवताम् उत्तमानि घोषवाक्यानि अपि अस्मै अभियानाय उपयोक्ष्यन्ते।

सखायः! मार्गसुरक्षाविषये सम्वादं कुर्वन् अहं Namo App इति प्रकल्पे कोलकातायाः अपर्णादासमहोदयायाः एकस्य सन्देशस्य चर्चां कर्तुम् इच्छामि। अपर्णा- महोदयया FastTag Programme-इत्यस्मिन् विषये सम्वादं कर्तुं परामृष्टम् अस्ति। तस्या: कथनम् अस्ति यत् 'FASTag' Programme-इत्यनेन यात्राया: अनुभव: परिवर्तितः । अनेन समयरक्षणं तु भवत्येव सहैव Toll plaza इति करसमर्पणकेन्द्रे प्रतीक्षाकरणं रोक्कधनप्रदानं च इत्यादिसमस्या: समाप्ता: सन्ति। अपर्णामहोदयाया: कथनं सम्यग् एव। पूर्वम् अस्माकं Toll plaza-इति करसमर्पणकेन्द्रे एकं यानं प्राय: सप्तत: अष्टमिनिट्- मितकालं यापयति स्म परं Fastag -इति द्रुतपत्रकस्य आगमना- नन्तरं एष: काल: न्यूनीभूय सार्द्धैकनिमेष: निमेषद्वयं वा जात:। प्रतीक्षासमये न्यूनता आगता इतिकारणेन वाहनानाम् ईन्धनानि रक्षितानि भवन्ति। अनेन देशवासिनां प्राय: एकविंशतिकोटिरुप्यकाणि रक्षितानि इति अनुमीयते। अर्थात् धनस्य रक्षणम् अपि, समयस्य च। अहं सर्वान् आग्रहं करोमि यत् दिग्निर्देशान् पालयन्त: स्वावधानं कुर्वन्तु, अथ च अन्येषां जीवनं रक्षन्तु ।

मम प्रिया: देशवासिन:! अस्माकं परम्परायां कथितम् अस्ति - 'जलबिन्दुनिपातेन क्रमश: पूर्यते घट:', अर्थात् एकेन एकेन च बिन्दुना घट: पूर्ण: भवति। अस्माकं प्रत्येकं प्रयासेन एव अस्माकं सङ्कल्पा: सिद्धा: भवन्ति। अत: एकविंशत्य- धिक-द्विसहस्रतमवर्षस्य आरम्भ:, यै: लक्ष्यै: अस्माभि: कृत: तानि

अस्माभिः मिलित्वा पूरणीयानि । तर्हि आयान्तु, वयं सर्वे मिलित्वा अमुं वर्षं सार्थकं कर्तुं पदक्षेपं
कुर्मः। भवन्तः स्वसन्देशान् स्वविचारान् च अवश्यं प्रेषयन्तु । आगामिनि मासे वयं पुनः मेलिष्यामः । इति प्रस्थानं कुर्मः पुनर्मेलनाय ।

*****

[भाषान्तरं - डॉ.श्रुतिकान्तपाण्डेय-पुरुषोत्तमशर्म-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com